ॐ श्रीपरमात्मने नम:

# अथ पञ्चदशोऽध्याय:

*श्रीभगवानुवाच*

ऊर्ध्वमूलमध:शाखम् अश्वत्थं प्राहुरव्ययम् ॥
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥
(15:1)

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा:
गुणप्रवृद्धा विषयप्रवाला: ॥
अधश्च मूलान्यनुसन्ततानि
कर्मानुबन्धीनि मनुष्यलोके ॥
(15:2)

न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च सम्प्रतिष्ठा ॥
अश्वत्थमेनं सुविरूढमूलम्
असङ्ग-शस्त्रेण दृढेन छित्त्वा ॥
(15:3)